केरलपाठावलिः

# संस्कृतम्

प्रथमा कक्ष्या

# अध्यापकमित्रम्

## TEACHER TEXT BOOK

KERALA READER

# SANSKRIT

## Standard – I

DRAFT

Government of Kerala
Department of General Education
State Council of Educational Research and Training (SCERT), Kerala 2024

# भूमिका

प्रवर्तनाधिष्ठिता छात्रकेन्द्रिता च पाठ्यपद्धतिः एव इदानीं प्रचाल्यमाना अस्ति। छात्राणां सर्वतोमुखविकासः एवास्याः पद्धत्याः लक्ष्यम्। शिशोः स्तरानुसारं विविधैः व्यवहाररूपैः सम्पुष्टमस्ति 'नवमालिका' नाम पाठ्यपुस्तकम्। छात्राणां कृते 'आरामः' नाम प्रवर्तनपुस्तकमपि सज्जीकृतम्। सरलतया प्रवर्तनानाम् अनुशीलनाय प्रवर्तनपुस्तकस्थं प्रवेशकप्रवर्तनं, पाठभागः, पठनप्रवर्तनानि, अनुबन्धः चेति क्रमः एकैकस्मिन् एकके स्वीकृतः। एतेषां प्रवर्तनानाम् आविष्करणाय अध्यापकस्य सहायकं भविष्यतीदं पुस्तकम्। पाठपुस्तके निर्दिष्टानां सर्वेषां प्रवर्तनानाम् आयोजनक्रमः, उत्पन्नरूपेण परिकल्पनीयाः अंशाः, मूल्यनिर्णयसूचकाः च सहायकपुस्तकेऽस्मिन् निर्दिष्टाः भवन्ति। इतोऽप्यधिकानि पठनप्रवर्तनानि कक्ष्यायां परिशीलयितुम् अध्यापकस्य स्वातन्त्र्यमस्ति। लिखितानां प्रवर्तनानां परिशीलनेन छात्राः भाषाप्रयोगे समर्थाः भवेयुः। निरन्तरमूल्यनिर्णयस्य सफलीकरणाय अध्यापकः यतताम्। तदर्थम् अध्यापकसाहाय्यपुस्तकमिदम् उपकारकं भवेत्।अपि च संस्कृतपठनं सर्वथा मधुरं सफलं च भवतु इति आशासे।

DRAFT

**भवदीयः**

**डा. जयप्रकाश् आर् के**
**निदेशकः**
**राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्**

# TEACHER TEXT BOOK DEVELOPMENT COMMITTEE
## SANSKRIT
## STANDARD - I

**Advisor**

**V. Madhavan Pillai,** Associate Professor in Sanskrit (Rtd.)

**Chairperson**

**Dr. Suneethi Devi T D,** Rtd. Special Officer (Sanskrit ),
DGE, Thiruvananthapuram

**Experts**

**Dr. K Retheesh**, Associate Professor, University College
Thiruvananthapuram

**Uma A K**, Associate Professor, Govt. Sanskrit College
Thiruvananthapuram

**Participants**

**Aniyan P**, Govt. U P School, Haripad, Alappuzha

**Ansa A**, Govt. U P School, Kavanad, Kollam

**Manoj P G,** St. George U P School, Venmony, Idukki

**Sreekanth T K**, Mullakkodi UP School, Kannur

**Sunilkumar B**, Nalanda TTI, Palode, Thiruvananthapuram

DRAFT

**ACADEMIC CO-ORDINATOR**

**Dr. S. Bindu**
Research Officer SCERT, Kerala.

**राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्**
**STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING,**
**KERALA**

# विषयानुक्रमणिका


| एककम् | | पाठस्य नाम | | व्यवहाररूपम् | पुटसङ्ख्या |
|---|---|---|---|---|---|
| १ | सौगन्धिकम् | | | | 6 |
| | | १ | स्वागतं मित्र! | बालकविता | 7-11 |
| | | २ | एहि वदाम ! | सम्भाषणम् | 12-19 |
| २ | मानवीयम् | | | | 20 |
| | | ३ | सखा स एव ! | चित्रकथा | 21-26 |
| | | ४ | कथयतु बाले ! | बालकविता | 27-31 |
| ३ | सौशील्यम् | | | | 32 |
| | | ५ | सामोदं गणयाम ! | विवरणम् | 33-38 |
| | | ६ | पालयाम जीवने ! | बालकविता | 39-44 |
| ४ | आरण्यकम् | | | | 45 |
| | | ७ | गच्छाम पश्याम | बालकविता | 46-53 |
| | | ८ | एतान् श्रृणवाम ! | सम्भाषणम् | 54-57 |


DRAFT

# वार्षिकासूत्रणम्

| क्रमसंख्या | मासः | पाठः | कालांशः | प्रवर्तनानि |
|---|---|---|---|---|
| 1 | जूण् | स्वागतं मित्र | 13 | कवितालपनम्, शब्दानुकरणम्, नामविवेचनम्, अक्षरकथनम्, लेखनम्, वर्णलेपनम्, नामकथनम्, सचित्रपुस्तके योजनम्। |
| 2 | जूलै | एहि वदाम | 14 | नूतनपदपरिचायनम्, आशयकथनम्, वर्णलेपनम्, यथोचितं योजनम्, नामकथनम्, अक्षरलेखनम्, वर्णकथनम्, मुखावरणनिर्माणम्, संभाषणावतरणम्, सचित्रपुस्तके योजनम्। |
| 3 | आगस्त् | सखा स एव | 14 | आशयकथनम्, नामकथनम्, मार्गदर्शनम्, अक्षरकथनम्, लेखनम्, वर्णलेपनम्, मुखावरणनिर्माणम्, परस्परपरिचायनम्, सचित्रपुस्तकयोजनम्। |
| 4 | सेप्तम्बर् ओक्टोबर् | कथयतु बाले | 13 | कवितालपनम्, आशयकथनम्, बन्धुवाचकशब्दकथनम्, अक्षरकथनम्, लेखनम्, वर्णलेपनम्, स्नेहोपचारशब्दकथनम्, सचित्रपुस्तके योजनम्। |
| 5 | ओक्टोबर् नवम्बर् | सामोदं गणयाम | 14 | गीतस्य साभिनयावतरणम्, सतालम् आलपनम्, आशयकथनम्, वर्णलेपनम्, अक्षरलेखनम्, संख्याकथनम्, क्रमानुसारं योजनम्, संख्याक्रीडाः, सचित्रपुस्तके योजनम्। |
| 6 | नवम्बर् डिसम्बर् | पालयाम जीवने | 13 | यथोचितं योजनम्, उचितानुचितविवेचनम्, अक्षरलेखनम्, कथनम्, वर्णलेपनम्, चित्रानुसारं वर्गीकरणम्, मार्गदर्शनम्, सचित्रपुस्तके योजनम्। |
| 7 | जनुवरि | गच्छाम पश्याम | 13 | कवितालपनम्, अक्षरकथनम्, लेखनम्, वर्णलेपनम्, कः इति वदाम, छाया का, यात्रानुभवकथनम्, यथोचितं योजनम्, मुखावरणनिर्माणम्, सचित्रपुस्तके योजनम्, चित्ररचना। |
| 8 | फेब्रुवरि मार्च् | एतान् शृणवाम | 14 | आशयकथनम्, मुखावरणनिर्माणम्, साभिनयसम्भाषणावतरणम्, सचित्रपुस्तके योजनम्, प्रश्नवाचकशब्दमुपयुज्य सम्भाषणम्, जीविनां नामकथनम्, वर्णलेपनम्। मूल्यनिर्णयः |

DRAFT

# एककम् - १

# सौगन्धिकम्

## आमुखम्

प्रकृतिरेव जननी इत्यनेन सर्वेषां प्राणिनां सृष्टिः प्रकृत्याः एव भवति इति सूच्यते। प्रकृतिः जीविनां सर्वाधारभूता भवति। सा सर्वैरादरणीया, संरक्षणीया च। प्रकृतेः सम्पत् जीवजालानि सस्यलतादीनि च। सर्वे चराचराः प्रकृत्याम् अधिष्ठिताः विलसन्ति। पक्षिमृगादयः वृक्षलतादयः जलफलपुष्पाणि च प्रकृतिजीवनेन अतीव सम्बन्धीनि। अतः छात्राणां मनसि एतान् प्रति आदरः स्नेहः मनोहरिता एतेषां परिपालनस्य महत्त्वं च उद्बोधनीयम्। प्रकृतेः मनोहारितायाः संरक्षणेन सह एतेषां परिपालनमधिकृत्यापि छात्रेषु अवबोधं जनयितुं 'सौगन्धिकम्' नाम एककम् आयोजितम्।

एककेऽस्मिन् पाठद्वयं विद्यते। 'स्वागतं मित्र!' इति प्रथमः पाठः 'एहि वदाम' इति द्वितीयः पाठःच ।

DRAFT

# प्रथमः पाठः

# स्वागतम् मित्र!

| | |
|---|---|
| **कालांशाः** | १३ |
| **प्रधानाशयः** | प्रकृतिः |
| **उपाशयः** | सूर्योदयः |
| **उद्देश्यानि/लक्ष्याणि** | प्रकृतिं तस्याः सुन्दरदृश्यानि च अधिकृत्य ज्ञानं सम्पादयति आस्वदते च। |
| **मूल्यम्/मनोभावः** | प्रकृतेः सौन्दर्यास्वादनेन सह तस्याः संरक्षणम् अपि आवश्यकम् इति प्रत्यभिजानाति। |
| **पठनलक्ष्याणि/शेषी/ नैपुणी-भाषापरम्** | १. कवितां सतालम् आलपति।<br>२. कवितायाः आशयं वदति।<br>३. 'र' इत्यक्षरं लेखनविध्यनुसारं लिखति वदति च।<br>४. नूतनपदानि परिचिनोति।<br>५. शब्दकोशं निरीक्ष्य अर्थं जानाति। |
| **पठनलक्ष्याणि/शेषी/ नैपुणी-आशयपरम्** | १. सूर्योदयमधिकृत्य ज्ञानं सम्पादयति।<br>२. प्रकृतिः अतिमनोहरी इति प्रत्यभिजानाति।<br>३. प्रभाते दृश्यमानानां पक्षिमृगादीनां नामानि प्रत्यभिजानाति। तेषां शब्दं परिचिनोति। |
| **व्यवहाररूपम्** | बालकविता |

DRAFT

### पाठस्यामुखम्

‘स्वागतं मित्र’ इत्यस्मिन् पाठभागे बालकवितारूपेण सूर्योदयः वर्णितः। तथैव प्रभाते दृश्यमानानां घटनानां वर्णनमपि कृतम्।

### पाठापग्रथनम्

अस्मिन् पाठे प्रातःकाले गृहं परितः विद्यमानानि दृश्यानि, सूर्योदयं च परिचाययितुम्

अवसरः दत्तः। पाठभागस्थानां चित्राणां प्रदर्शनेन (पुटसंख्या ८-९) विवरणेन च एतत् कर्तुं शक्यते। 'स्वागतं मित्र' इति बालकवितायाम् एकां बालिकां प्रति सम्भाषणरूपेण सूर्योदयदृश्यं प्रतिपाद्यते। काकानां रटनम्, कोकिलानां कूजनम्, उद्याने विकसितानि पुष्पाणि च वर्ण्यन्ते।

**प्रवेशकप्रवर्तनम्**

पाठपरिचायनात् पूर्वम् 'आरामः' इति प्रवर्तनपुस्तके दत्तानि त्रीणि प्रवर्तनानि कारयितव्यानि। तानि 'वर्णः वर्णः', 'पूरयाम', 'खगान् पश्याम' (पुटसंख्या ७-९) चेति। अनन्तरं 'नवमालिका' इति पाठपुस्तके प्रदत्तं प्रवेशकप्रवर्तनं (पुटसंख्या – ९) कारयितव्यम्।

प्रवेशकप्रवर्तने दत्तं चित्रं प्रदर्श्य चित्रे किं किं पश्यति? इति अध्यापिका/अध्यापकः पृच्छति (पुटसंख्या ८-९). छात्राः उत्तरं वदन्ति। अध्यापिका/अध्यापकः क्रोडीकरोति।

पाठभागस्थं चित्रं प्रदर्श्य (पुटसंख्या १०-११) तत्र विद्यमानानां पक्षिणां पुष्पाणां च नाम्नां विविच्य कथनाय निर्दिशति। छात्राः उत्तरं वदन्ति (मातृभाषायां वा)। छात्राणाम् उत्तरकथने सञ्जायमानानां स्खालित्यानां निवारणम् अध्यापकेन/अध्यापिकया कार्यम्।

**प्रवर्तनम् - १**

**कवितायाः सतालमालपनम् आशयकथनम् च।**

अध्यापकः/अध्यापिका कवितां सतालमालपति। अनन्तरं ICT द्वारा श्रावयति। छात्रान् अनुगायनाय प्रेरयति। छात्राः अनुगायन्ति। तदा सञ्जायमानान् दोषान् अध्यापिका/अध्यापकः निवारयति। यः मनोहारितया आलपति सः अभिनन्दनीयः प्रोत्साहनीयःच। समानरीत्या मातृभाषायां विद्यमानानि गीतानि समाहृत्य कक्ष्यायाम् अवतारणाय निर्दिशति। तानि Digital माध्यमेन ध्वनिमुद्रणं कृत्वा सञ्चिनोतु च। मातृभाषायां कवितायाः आशयकथनाय छात्रान् प्रेरयति अध्यापिका/अध्यापकः। अशयकथनावसरे नूतनपदानाम् अर्थज्ञानाय शब्दकोशं पश्यतु।

**प्रवर्तनम् - २**

**पक्षिमृगादीनां नामकथनं शब्दानुकरणं च।**

अध्यापकः/अध्यापिका छात्राणां गृहं विद्यालयं वा परितः विद्यमानानां परिचितानां



DRAFT

पक्षिणां मृगाणां च नामकथनाय निर्दिशति। तैः परिचितानां पक्षिणां मृगाणां च नामानि छात्राः कथयन्ति। ततः अध्यापिका तेषां शब्दानाम् अनुकरणाय प्रेरयति। तानि संशोधयतु । ततः Digital माध्यमेन समाहरतु। प्रवर्तनमिदं सरलतया क्रीडारूपेण कारयितुं शक्यते।

**मूल्यनिर्णयसूचिका**

नामविवेचनकथनम्, शब्दानुकरणौचित्यम्।

## प्रवर्तनम् - ३

**सूर्योदयचित्ररचना**

अध्यापकः/अध्यापिका ICT द्वारा वा समुचितमाध्यमेन विविधपश्चात्तलेषु दृश्यमानानां सूर्योदयचित्राणां प्रदर्शनं करोतु। तत् दृष्ट्वा छात्राः इच्छानुसारं चित्रम् आरामः इति प्रवर्तनपुस्तके दत्तस्थाने रचयन्तु।अध्यापिका/अध्यापकः संशोधयतु च। ततः आरामे (पुटसंख्या १३) 'रचयतु माम्' इति प्रवर्तनम् अपि कारयतु।

**मूल्यनिर्णयसूचिका**

आशयधारणा, उचितवर्णलेपनम्, चित्राणां व्यक्तता।

## प्रवर्तनम् - ४

**अक्षरकथनं लेखनं वर्णलेपनं च।**

अध्यापकः/अध्यापिका पाठपुस्तके दत्तं 'र' इति अक्षरं परिचाययति। तदर्थं SCERT द्वारा सज्जीकृतं 'मधुवाणी' इति Animated CD उपयोक्तव्यम्। पुनः तद्दृष्ट्वा अक्षरकथनाय विध्यनुसारं लेखनाय च निर्दिशति। ततः 'आरामः' इति प्रवर्तनपुस्तके (पुटसंख्या ११) दत्तम् 'अक्षरं लिखाम' इति प्रवर्तनं कारयतु। अनन्तरं (पुटसंख्या १२) 'र' इत्यक्षरस्य वलयीकरणाय दत्तं प्रवर्तनम् अपि कारयतु। ततः अक्षरयुक्तायाः सद्यःप्रदर्शिन्याः निर्माणार्थं निर्दिशतु अध्यापकः/ अध्यापिका। यथोचितं साहाय्यं दातव्यम्।

**मूल्यनिर्णयसूचिका**

विध्यनुसारम् अक्षरलेखनम्, अक्षरविवेचनम्, सद्यःप्रदर्शिनी।

DRAFT

## प्रवर्तनम् - ५

**प्रभातसम्बन्धीनां चित्राणां समाहरणं सचित्रपुस्तके योजनं वर्णलेपनं च।**

'स्वागतं मित्र!' इति पाठे दत्तं चित्रं दृष्ट्वा तादृशानि प्रभातसम्बन्धीनि चित्राणि समाहृत्य सचित्रपुस्तके योजनाय निर्दिशति। (टिप्पणीपुस्तकवत् एकं पुस्तकं स्वीकृत्य सचित्रपुस्तकरूपेण संरक्षणीयम्) ततः पाठपुस्तके दत्तस्य चित्रस्य उचितैः वर्णैः लेपनाय निर्दिशतु। प्रवर्तनेऽस्मिन् अध्यापकेन/अध्यापिकया उचितं साहाय्यं कार्यम्।

**मूल्यनिर्णयसूचकाः**

चित्रस्य औचित्यम्, उचितरीत्या चित्राणां योजनम्।

## प्रवर्तनम् - ६

**वर्णलेपनम्**

'आरामः' इति प्रवर्तनपुस्तके विद्यमानं 'लेपयाम वर्णम्' इति प्रवर्तनं (पुटसंख्या १०) कारयतु। वर्तुलाकारे विद्यमानानि सू र्यो द यः इति प्रवर्तनम् अक्षराणि सूर्यस्य वर्णेन लेपनाय निर्दिशति।

**मूल्यनिर्णयसूचकः**

उचितवर्णलेपनम्।

## प्रवर्तनम् - ७

**पुष्पाणां नामकथनम्**

नवमालिकायां प्रदत्तम् (पुटसंख्या १५) उद्यानस्य चित्रं निरीक्ष्य तत्र विद्यमानानां पुष्पाणां नामानि मातृभाषया वा कथयन्तु छात्राः। तदा अध्यापकः/अध्यापिका उचितपदानां कथनाय साहाय्यं प्रोत्साहनं च करोतु। प्रवर्तनमिदं 'एहि वदाम' इति द्वितीयपाठस्य शृङ्खलाप्रवर्तनरूपेण कल्पितम्।

**मूल्यनिर्णयसूचकः**

पुष्पाणां नामविवेचनम्।

**अधिकांशः**

नवमालिकायाम् अस्य पाठस्य अनुबन्धे दत्तस्य केरलस्य औद्योगिकपुष्पं

DRAFT

कर्णिकारम् इत्यस्य परिचायनं करोतु। एवमेव 'मित्रः मित्रं सर्वेषाम्' इति सूक्तेः अर्थकथनं परिचायनं च कार्यम्।

सविशेषश्रद्धार्हाणां छात्राणां कृते बिन्दून् योजयित्वा अक्षरलेखनं सचित्रपुस्तके चित्रयोजनम्, चित्राणां वर्णलेपनम् इत्यादीनि प्रवर्तनानि निर्दिष्टानि।

**पठनसामग्र्यः**

पाठपुस्तकम्, प्रवर्तनपुस्तिका, मधुवाणी, संस्कृतमाधुरी, चार्ट्-पत्रम्, सद्यःप्रदर्शिनी, श्यामफलकम् इत्यादीनि।

**प्रतीक्षितोत्पन्नानि**

सचित्रपुस्तकम्, सद्यःप्रदर्शिनी, ध्वनिमुद्रिका

**शब्दकोशः**

| | |
|---|---|
| कुक्कुटः – പൂവൻകോഴി | कपोतः – പ്രാവ് |
| काष्ठकूटः – മരംകൊത്തി | उलूकः – മൂങ്ങ |
| चटका – കുരുവി | तुरगः – കുതിര |
| दूरवाणी – ഫോൺ | रसना – നാവ് |
| रविः – സൂര്യൻ | सूरणः – ചേന |

अन्येषां पक्षिणां पुष्पाणां च नामज्ञानाय संस्कृतमाधुरी इत्यस्य बालरञ्जिनीं (Book No 1), व्यवहारपदमालां च (Book No 1) पश्यतु।

DRAFT

# द्वितीयः पाठः

# एहि वदाम।

**कालांशाः** १४

**प्रधानाशयः** प्रकृतिः

**उपाशयः** पुष्पाणि

**उद्देश्यानि/लक्ष्याणि** प्रकृतिः मनोहरी भवति। सा संरक्षणीया। वृक्षाणां, सस्यलतादीनां, जलाशयानां, पक्षिमृगादीनां च संरक्षणेन प्रकृतेः संरक्षणं करणीयम्। प्रकृतेः सुन्दरदृश्यभूतम् उद्यानम् अधिकृत्य ज्ञानम्। उद्यानं निरीक्ष्य जीवजालानां पुष्पाणां च नामानि परिचिनोति। वर्णानां संस्कृतपदानि प्रत्यभिजानाति।

**मूल्यम्/मनोभावः** प्रकृतेः संरक्षणाय सस्यलतादीनां संरक्षणम् अवश्यं कर्तव्यम् इति प्रत्यभिजानाति।

**पठनलक्ष्याणि/ शेषी/ नैपुणी-भाषापरम्**

सम्भाषणम् अवतारयति।

नूतनपदानि परिचिनोति।

शब्दकोशं निरीक्ष्य अर्थं जानाति।

स्नेहोपचारशब्दान् च परिचिनोति प्रयुङ्क्ते च।

लेखनविध्यनुसारं 'प' इति अक्षरं लिखति वदति च।

**पठनलक्ष्याणि/ शेषी/ नैपुणी-आशयपरम्**

चित्रं दृष्ट्वा पुष्पाणां जीवजालानां च नामानि विवेचयति। तेषां संस्कृतपदानि जानाति।

पाठभागस्य आशयम् अवगच्छति, वदति।

चित्राणि निरीक्ष्य वर्णान् प्रत्यभिजानाति।

**व्यवहाररूपम्** सम्भाषणम्।

**पाठस्यामुखम्**

'एहि वदाम' इति पाठे उद्याने विद्यमानानां पुष्पाणां नाम्नां तथा वर्णानां च परिचायनम् अनेन पठनेन उद्दिश्यते। पुष्पपतगयोः सम्भाषणरूपेण पाठोऽयम्

DRAFT

आविष्कृतः। तथा स्नेहोपचारशब्दानां प्रयोगः अपि अन्तर्भवति।

**पाठापग्रथनम्**

उद्याने सञ्जायमानघटना एव पाठभागत्वेन स्वीकृता। एकः चित्रपतगः पुष्पाणां समीपं गत्वा सम्भाषणं करोति। पुष्पपतगयोः मिथः सौहृदसम्भाषणमेव पाठभागत्वेन सूचितम्।

**प्रवेशकप्रवर्तनम्**

'एहि वदाम' इति पाठस्य बोधनात् पूर्वम् 'आरामः' इति प्रवर्तनपुस्तके दत्तानां 'निलीनं किम्?', 'गन्तव्यं मया', 'वर्णं ददातु' (पुटसंख्या १४-१६) इति प्रवर्तनानां परिशीलनं ददातु। उचितरीत्या करणाय प्रोत्साहनं करणीयम्। अनन्तरं नवमालिका इति पाठ्यपुस्तके दत्तं चित्रं (पुटसंख्या १७) प्रदर्श्य चित्रे किं किं पश्यति ? इति पृच्छति अध्यापिका/अध्यापकः। छात्राः उत्तराणि वदन्ति। एवं प्रश्नोत्तररूपेण चित्रस्य आशयकथनाय प्रेरयति। अध्यापकः / अध्यापिका क्रोडीकरोति। अनन्तरं पाठभागम् आरभते।

अध्यापिका/अध्यापकः 'एहि वदाम' इति पाठे योजितं चित्रं प्रदर्शयति। चित्रे किं किं पश्यति? इति पृच्छति। छात्राः तत्र विद्यमानानां पुष्पाणां जीविनां च नामानि वदन्ति। तथा अध्यापिका/अध्यापकः तत्र सूचितानां सम्भाषणशकलानां परिचायनं करोति आशयं वदति च। ततः सम्भाषणरूपेण वाक्यानां क्रमीकरणं कृत्वा पतगपुष्पाणां सम्भाषणस्य आशयमपि क्रोडीकरोति।

DRAFT

## प्रवर्तनम् - १

**नूतनपदपरिचायनम् आशयकथनं च।**

अध्यापिका/अध्यापकः पाठभागस्थे चित्रे विद्यामानान् सम्भाषणांशान् ICT द्वारा वा विविधमाध्यमेन वा प्रदर्शयति। तान् मातृभाषया विशदीकरोति। एवं चित्रे विद्यमानानां पुष्पाणां जीविनां च संस्कृतनामानां वर्णानां च परिचायनं करोति।पदानाम् अर्थज्ञानाय शब्दकोशं पश्यतु च।

यथा –

मल्लिका – മുല്ലപ്പൂവ്      पालटम् – റോസാപ്പൂവ്

पतगः – ചിത്രശലഭം      पाटलवर्णः – റോസ്നിറം

**रक्तवर्णः** – ചുവപ്പുനിറം

**पीतवर्णः** – മഞ്ഞനിറം

**श्वेतवर्णः** – വെള്ളനിറം

**नीलवर्णः** – നീലനിറം

ततः नवमालिकायां Page No 20 मध्ये दत्तं सम्भाषणं श्रावयतु। आशयं विशदीकरोतु।

तव नाम किम्?

मम नाम सूर्यकान्तिः।

.....................................................

.....................................................

एवं पाठस्य पूर्णम् आशयम् अवगच्छन्ति छात्राः। ततः स्वनामकथनार्थं परस्परपरिचायनार्थं च प्रश्नोत्तरक्रीडां चालयितुम् अध्यापकेन/अध्यापिकया यत्नः कार्यः। यथा-अहं श्रीजेशः। तव नाम किम् ?....................

**मूल्यनिर्णयसूचकाः**

पदार्थकथनम्, आशयकथनम्, वर्णविवेचनम्।

## प्रवर्तनम् - २

**वर्णलेपनम्**

अध्यापिका / अध्यापकः पाठपुस्तके (नवमालिकायां पुटसंख्या २०) दत्तं प्रवर्तनं प्रदर्शयतु। ततः तत्रस्थम् एकैकं पुष्पम् उचितवर्णैः लेपयितुं निर्दिशतु। ततः छात्रैः लेपितं चित्रं संशोधयतु।

**मूल्यनिर्णयसूचकाः**

वर्णचयने औचित्यम्, पूर्णता।

## प्रवर्तनम् - ३

**यथोचितयोजनं कथनं च।**

अध्यापिका/अध्यापकः नवमालिकायां (पुटसंख्या २१) दत्तं चित्रं प्रदर्शयति। ततः यथोचितयोजनाय निर्दिशति संशोधयति च। अनन्तरं नामकथनाय निर्दिशति। नामकथने स्खालित्यं परिहरति च। विद्यालये परिसरे वा विद्यमानम्

DRAFT

एतादृशम् उद्यानं गत्वा तत्रस्थपुष्पाणां नामानि अपि परिचाययति।

यथा –

| | |
|---|---|
| तुलसी – തുളസി | द्रोणपुष्पम् – തുമ്പപ്പൂവ് |
| चम्पकम् – ചെമ്പകം | सेवन्तिका – ജമന്തി |
| अपराजिता – ശംഖപുഷ്പം | सूर्यकान्तिः – സൂര്യകാന്തി |

**मूल्यनिर्णयसूचकाः**

यथोचितयोजनम्,उचितनामकथनम्

## प्रवर्तनम् - ४

**कः? कुत्र?**

अध्यापिका आरामे दत्तं 'कः? कुत्र?' (पुटसंख्या १७) इति प्रवर्तनस्य परिशीलनाय छात्रान् निर्दिशति चित्रं प्रदर्शयति च। छात्राः जीविनां वासस्थानं यथोचितं योजयन्तु। अध्यापिका/अध्यापकः संशोधयतु।

**मूल्यनिर्णयसूचकः**

उचितयोजनम्

## प्रवर्तनम् - ५

**अक्षरलेखनं कथनं वर्णलेपनं च।**

अध्यापिकया / अध्यापकेन नवमालिकायां प्रदत्तस्य (पुटसंख्या २२) प्रवर्तनस्य परिशीलनाय 'मधुवाणी' उपयोक्तव्या। अथवा प इत्यक्षरयुक्तां सद्यःप्रदर्शिकां प्रदर्शयतु। एवम् अक्षरपरिचायनं करोतु। एतदर्थं बालरञ्जिनी, व्यवहारमाला चेति पुस्तकद्वयम् (Book No 1 & 6) उपयोक्तव्यम्।

ततः पाठपुस्तकस्थे प्रवर्तने दत्तस्य अक्षरस्य विध्यनुसारं लेखनाय निर्दिशतु। लिखितमक्षरं संशोधयतु च।

अक्षरं वदति, वर्णेन लेपयति च। पठितम् अक्षरं सद्यःप्रदर्शिन्यां लिखित्वा आनयनाय निर्दिशतु। आनीतां सद्यःप्रदर्शिनीं कक्ष्यायां प्रदर्शयतु।

**मूल्यनिर्णयसूचकाः**

विध्यनुसारम् अक्षरलेखनम्, सद्यःप्रदर्शिनीनिर्माणम्

## प्रवर्तनम् - ६

**अक्षरं लिखाम।**

अध्यापिका/अध्यापकः आरामे दत्तम् 'अक्षरं लिखाम' (पुटसंख्या १८) इति प्रवर्तनस्य निर्देशानुसारं परिशीलनाय प्रेरयति। छात्राः बिन्दून् योजयित्वा अक्षरं लिखति। लिखितमक्षरं संशोधयति अध्यापिका। ततः आरामे (पुटसंख्या १९) दत्तानि चित्राणि दृष्ट्वा तेषां नामभ्यः पठितम् अक्षरं विविच्य वलयीकरोतु प्रत्येकं छात्रः। अध्यापिका/अध्यापकः संशोधयतु च।

**मूल्यनिर्णयसूचकाः**

विध्यनुसारम्,अक्षरलेखनम्, वलयीकरणम्

## प्रवर्तनम् - ७

**वर्णकथनम्**

अध्यापिका/अध्यापकः नवमालिकायां (पुटसंख्या २३) प्रदत्तं चित्रं प्रदर्शयति। तत्रस्थचित्राणि दृष्ट्वा तेषां वर्णानां कथनाय निर्दिशति। छात्राः वदन्तु। अध्यापिका/अध्यापकः संशोधयतु च।

**मूल्यनिर्णयसूचकः**

वर्णप्रत्यभिज्ञानम्

## प्रवर्तनम् - ८

**चित्रपूरणम् उचितवर्णलेपनं च।**

अध्यापिका/अध्यापकः नवमालिकायां दत्तं (पुटसंख्या २३) चित्रं प्रदर्शयति। ततः चित्रे बिन्दुभिः सूचितान् भागान् योजयित्वा पूरणाय उचितैः वर्णैः लेपनाय च निर्दिशति। छात्रैः कृतं प्रवर्तनं शोधयतु अध्यापिका। उचितरीत्या कुर्वन्तः छात्राः अभिनन्दनीयाः। सर्वे प्रोत्साहनीयाः।

**मूल्यनिर्णयसूचकाः**

औचित्यम्, पूर्णता।

DRAFT

## प्रवर्तनम् - ९

### मुखावरणनिर्माणं सम्भाषणावतारणं च।

अध्यापिका नवमालिकायां (पुटसंख्या २४) दत्तं चित्रं प्रदर्शयति। तत्रस्थनिर्देशानुसारम् अध्यापिका/अध्यापकः आवश्यकं चेत् प्रवृत्तिपरिचयाध्यापिकायाः साहाय्येन पुष्पसदृशानि मुखावरणानि निर्मातु। एवं मुखावरणनिर्माणाय छात्रान् निर्दिशतु। गृहपाठरूपेणेदं प्रवर्तनं कारयितुं शक्यते। अतः तदर्थं रक्षाकर्तृणाम् अपि साहाय्यं स्वीकर्तुं शक्यते छात्रैः।

ततः निर्मितानि मुखावरणानि धृत्वा स्नेहोपचारशब्दान् उपयुज्य आरामे (पुटसंख्या २१) दत्तं मम नाम इति प्रवर्तनं परिशीलयतु।

यथा – प्रथमः – नमस्ते।

द्वितीयः – नमस्ते। सुप्रभातम्।

प्रथमः – सुप्रभातम्।

द्वितीयः – मम नाम ...........। भवतः नाम किम्?

प्रथमः – मम नाम ...............।

............... इति।

सम्भाषणावतारणसमये जायमानानां स्खालित्यानां दूरीकरणाय अध्यापकेन/अध्यापिकया श्रद्धा कार्या। छात्राः प्रोत्साहनीयाः।

### मूल्यनिर्णयसूचकाः

पुष्पसदृशमुखावरणनिर्माणे औचित्यम्, सम्भाषणावतारणे भागभागित्वम्, उचितपदप्रयोगः।

## प्रवर्तनम् - १०

### सौन्दर्यं वर्धयतु।

आरामे (पुटसंख्या २०) प्रदत्तस्य चित्रस्य निर्देशानुसारं निर्दिष्टस्थानम् उचितवर्णैः लेपयन्तु छात्राः। अध्यापिका/अध्यापकः संशोधयतु।

DRAFT

**मूल्यनिर्णयसूचकाः**

औचित्यम्, पूर्णता।

## प्रवर्तनम् - ११

**पुष्पाणां निर्माणं सचित्रपुस्तके योजनं च।**

अध्यापिका/अध्यापकः नवमालिकायां (पुटसंख्या २४) निर्दिष्टप्रवर्तनपरिशीलनाय निर्दिशति। तदर्थं बहुवर्णपत्राणि उपयुज्य पुष्पाणां निर्माणाय निर्दिशतु अध्यापिका/अध्यापकः। निर्माणार्थं छात्रैः प्रवृत्तिपरिचयाध्यापिकायाः, रक्षाकर्तॄणां च साहाय्यं स्वीकर्तुं शक्यते। निर्मितानि पुष्पाणि सचित्रपुस्तके योजयतु।

**मूल्यनिर्णयसूचकाः**

औचित्यम्, पूर्णता।

## प्रवर्तनम् - १२

**नामकथनम्**

अध्यापिका/अध्यापकः नवमालिकायां (पुटसंख्या २४) दत्तं चित्रं प्रदर्शयति। चित्रे किं किम् अस्ति? इति पृच्छति। छात्राः उत्तरं वदन्ति। छात्राणां मिथः क्रीडारूपेण इदं प्रवर्तनं कारयितुं शक्यते।

यथा – शुनकः, मार्जारः, पतगः, सूर्यकान्तिः, मल्लिका इत्यादि।

अध्यापिकया/अध्यापकेन यथोचितं साहाय्यं कार्यम्। एतत् प्रवर्तनम् अग्रिमपाठप्रवेशनार्थं श्रृङ्खलाप्रवर्तनरूपेण कल्पितम्।

**अधिकांशः**

अनुबन्धे दत्तस्य भारतस्य औद्योगिकपुष्पम् 'कमलम्' इत्यस्य परिचायनं करोतु। एवमेव 'प्रकृतिरेव जननी' इति सूक्तेः परिचायनम् आशयकथनं च कार्यम्।

**सविशेषश्रद्धार्हाणां कृते प्रवर्तनानि।**

बिन्दून् योजयित्वा अक्षरलेखनम्, सचित्रपुस्तके चित्रयोजनम्, चित्राणां वर्णलेपनम्, मुखावरणनिर्माणम् इत्यादिप्रवर्तनानि निर्दिष्टानि।

DRAFT

**पठनसामग्र्यः**

पाठपुस्तकम्, प्रवर्तनपुस्तिका, मधुवाणी, संस्कृतमाधुरी, चार्ट् पत्रम्, सद्यःप्रदर्शिनी, श्यामफलकम्।

**प्रतीक्षितोत्पन्नानि**

सचित्रपुस्तकम्, सद्यःप्रदर्शिनी, पुष्पसदृशमुखावरणम्, बहुवर्णपत्राणि उपयुज्य पुष्पमातृका च।

**शब्दकोशः**

| | |
|---|---|
| मार्गः – വഴി | निलयः – വീട് |
| नीडम् – പക്ഷിക്കൂട് | शुनकपञ्जरः – പട്ടിക്കൂട് |
| मधुमक्षिका – തേനീച്ച | मधुमक्षिकाकोशम् – തേനീച്ചക്കൂട് |
| वापी – കുളം | पत्रम् – ഇല |
| पनसम् – ചക്ക | आपणः – കട |
| पर्वतः – പർവ്വതം | |

DRAFT

# एककम् - २

# मानवीयम्

## आमुखम्

मानविकता इत्यनेन सर्वैः सह समत्वेन साहोदर्येण आदरेण च वर्तनस्य प्राधान्यम् उद्दिश्यते। एतत् मनुष्यजीवनस्य आधारः भवति। लोकाः समस्ता सुखिनो भवन्तु, वसुधैव कुटुम्बकम् इत्यादयः सूक्तयः अस्याः महत्त्वम् उद्घोषयन्ति।

अस्य एककस्य प्रधानाशयः मानविकता भवति। मानविकतायाः अङ्गभूतानि स्नेहः, आर्द्रता, सौहृदं, मैत्री इत्यादीनि उपाशयत्वेन स्वीकृतानि।

सौहृदम् इति उपाशयं प्रधानत्वेन स्वीकृत्य 'सखा स एव' इति चित्रकथा प्रथमपाठत्वेन स्वीकृता। पाठेऽस्मिन् पक्षिणः मृगाश्च कथापात्राणि। स्नेहम् आर्द्रतां च प्रधानत्वेन स्वीकृत्य 'कथयतु बाले' इति बालकविता आयोजिता। यथा कुटुम्बे मनुष्याः स्नेहेन जीवन्ति तथा तटाकेऽपि जीविनः सौहार्देन वर्तन्ते इत्यत्र प्रतिपाद्यते।

DRAFT

# तृतीयः पाठः

# सखा स एव

| | |
|---|---|
| **कालांशाः** | १४ |
| **प्रधानाशयः** | मानविकता |
| **उपाशयः** | सौहृदम् |
| **उद्देश्यानि/लक्ष्याणि** | मानविकता सौहृदं सहजीविस्नेहः चेत्यादि गुणैः प्रकटीक्रियते। जन्मना शत्रवः चेदपि आपत्काले तेऽपि सहायकाः भवेयुः इति प्रत्यभिजानाति। |
| **मूल्यम्/मनोभावः** | मानवजीवने सहजीविस्नेहस्य प्राधान्यम् अवगच्छति। |
| **पठनलक्ष्याणि/ शेषी/ नैपुणी-भाषापरम्** | कथापात्राणां संस्कृतनामानि अवगच्छति।<br>कथापात्राणां शब्दानुकरणम्।<br>नूतनपदपरिचयः शब्दकोशं दृष्ट्वा अर्थज्ञानं च।<br>लेखनविध्यनुसारं न इत्यक्षरं लिखति वदति च।<br>पदेभ्यः न इत्यक्षरं विवेचयति। |
| **पठनलक्ष्याणि/ शेषी/ नैपुणी-आशयपरम्** | चित्रानुसारं पाठभागस्य आशयम् अवगच्छति।<br>कथाकथननैपुणीं समार्जयति। |
| **व्यवहाररूपम्** | चित्रकथा |

DRAFT

## पाठस्यामुखम्

'सखा स एव' इति पाठः चित्रकथा भवति। अनेन पाठेन प्रकृत्या सहजीविभिः च साकं स्नेहेन वर्तितव्यम् इति आशयः प्रतिपादितः। अनेन पक्षिमृगादीनां नामानि शब्दान् च परिचाययति। स्नेहः सौहृदम् इत्यादीनि मूल्यानि जीवने आर्जनीयानि इति उद्बोधयति पाठोऽयम्।

## पाठापग्रथनम्

गृहाङ्कणे बालिका बालकः च क्रीडतः। तयोः समीपे शुनकः, शशकः, मार्जारः च क्रीडन्ति।तदा एकः नकुलः आगच्छति। तत्र नकुलस्य आगमनसमये किं किं

सम्भवति? इति चित्रकथारूपेण प्रदर्श्य सौहृदम् इति आशयं प्रतिपादयति।

**प्रवेशकप्रवर्तनम्**

'सखा स एव' इति पाठस्य बोधनात् पूर्वम् 'आरामः' इति प्रवर्तनपुस्तके प्रथमतः आरभ्य तृतीयपर्यन्तं प्रवर्तनानि कारयितव्यानि। 'मित्रं कुत्र' ?, 'शब्दः कः?', 'कः धावति?' (पुटसंख्या २२-२४) इत्येतानि प्रवर्तनानि परिशीलनाय ददातु। अनन्तरं नवमालिकायां दत्तं चित्रं (पुटसंख्या २७) प्रदर्श्य पक्षिमृगादीनां नाम्नां कथनाय प्रेरयतु। ततः पक्षिमृगादीनां सौहृदकथाकथनाय छात्रान् निर्दिशति। छात्रैः कथितानि क्रोडीकरोतु अध्यापिका / अध्यापकः। ततः पाठस्य आरम्भः क्रियताम्।

अध्यापकः/अध्यापिका सखा स एव इति पाठभागस्थं चित्रं ICT माध्यमेन / चार्ट् पत्रे विरच्य वा प्रदर्श्य चित्रे किं किं पश्यति ?इति छात्रान् पृच्छति। छात्राः चित्रं दृष्ट्वा उत्तरं वदन्ति। अनन्तरम् अध्यापकः/अध्यापिका छात्रैः उक्तानि वाक्यानि क्रोडीकृत्य कथायाः आशयं विशदयति। विशदीकरणसमये अध्यापकेन/ अध्यापिकया सौहृदस्य प्राधान्यं वक्तव्यम्।

DRAFT

### प्रवर्तनम् - १

**आशयकथनम्**

अध्यापकः/अध्यापिका पाठभागस्थं चित्रं ICT / चार्ट् पत्रे विरच्य वा प्रदर्श्य तेन चित्रेण सूचितस्य आशयस्य कथनाय छात्रान् प्रेरयतु। एवमेव द्वितीयं चित्रं प्रदर्श्य आशयकथनाय प्रेरयति। छात्राः मातृभाषया आशयं कथयन्ति। अध्यापकः सरलेन संस्कृतेन आशयं वदतु।

**मूल्यनिर्णयसूचकाः**

आशयकथनम्, सम्पूर्णता, मृगाणां नामकथनम्।

### प्रवर्तनम् - २

**चित्रं दृष्ट्वा नामकथनम्**

अध्यापकः/अध्यापिका पाठभागस्थं चित्रं ICT द्वारा / चार्ट् पत्रे विरच्य वा प्रदर्श्य पक्षिमृगादीनां नामकथनाय निर्दिशतु। छात्राः उत्तरं वदन्ति अध्यापकः/ अध्यापिका संशोध्य साधूत्तरं वदतु।

**मूल्यनिर्णयसूचकाः**

उचितनामकथनम्, उच्चारणशुद्धिः।

## प्रवर्तनम् - ३

**केन मार्गेण?**

आरामे पुटसंख्या २५ मध्ये 'केन मार्गेण'? इति प्रवर्तनस्य परिशीलनाय निर्दिशतु। अध्यापिका/अध्यापकः आरामस्थं चित्रं प्रदर्शयतु। तत्र सूचितवत् शशकस्य, मार्जारस्य , शुनकस्य च तेषां सुहृदः शुकस्य समीपं गन्तुं मार्गदर्शनाय निर्दिशतु। आवश्यकं चेत् अध्यापकेन/ अध्यापिकया साहाय्यं कार्यम्।

**मूल्यनिर्णयसूचकाः**

औचित्यम्, पूर्णता।

## प्रवर्तनम् - ४

**अक्षरकथनं लेखनं वर्णलेपनं च।**

अध्यापकः/अध्यापिका नवमालिकायां दत्तं 'न' इति अक्षरं परिचाययति। तदर्थं SCERT द्वारा सज्जीकृतं मधुवाणी इति अनिमेट्टड् CD उपयोक्तव्यम्। पुनः तद्दृष्ट्वा अक्षरकथनाय विध्यनुसारं लेखनाय च प्रेरयति।

**मूल्यनिर्णयसूचकाः**

औचित्यम् , पूर्णता , शुद्धोच्चारणम्।

## प्रवर्तनम् - ५

**अक्षरं लिखाम**

अध्यापकः /अध्यापिका आरामः इति प्रवर्तनपुस्तके विद्यमानस्य (पुटसंख्या २६) 'अक्षरं लिखाम' इति प्रवर्तनस्य परिशीलनाय निर्दिशतु। लेखनावसरे छात्राणाम् आवश्यकं चेत् अध्यापकेन/अध्यापिकया साहाय्यं कार्यम्। ततः आरामे (पुटसंख्या २७) दत्तं प्रवर्तनं कारयतु। तदर्थं तत्र दत्तेभ्यः पदेभ्यः न इत्यक्षरस्य वलयीकरणाय निर्दिशति। अत्रापि अध्यापकेन/अध्यापिकया उचितं साह्यं कार्यम्। प्रवर्तनमिदं क्रीडारूपेण कारयितुं शक्यते।

DRAFT

## प्रवर्तनम् - ६

### मुखावरणनिर्माणं परस्परपरिचायनं च।

अध्यापिका/अध्यापकः नवमालिकायां (पुटसंख्या ३३) दत्तं मुखावरणनिर्माणं, तत् धृत्वा परस्परपरिचायनम् इति प्रवर्तनपरिशीलनाय सज्जा/ सज्जः भवतु। उदाहरणतया पाठस्थस्य कस्यापि मृगस्य मुखावरणम् आवश्यकं चेत् प्रवृत्तिपरिचयाध्यापकस्य साहाय्येन निर्मातु। तद्दृष्ट्वा सम्भाषणं करोतु।

यथा - अहं नकुलः, भवान् कः?

अहं शशकः

.................................

एवं प्रवर्तनम् अनुवर्तनीयम्।

ततः छात्रान् मृगाणां मुखावरणानिर्माणाय निर्दिशतु। गृहकार्यत्वेन दातुं शक्यते प्रवर्तनमिदम्। आवश्यकं चेत् रक्षाकर्तॄणां साहाय्यम् अपि स्वीकर्तुं शक्यते। मुखावरणानि धृत्वा  कक्ष्यायां परस्परपरिचायनक्रीडां चालयतु। सम्भाषणावसरे स्खालित्यदूरीकरणं करोतु अध्यापकः/अध्यापिका।

### मूल्यनिर्णयसूचकाः

मुखावरणे व्यक्तता, भागभागित्वम्, शुद्धोच्चारणम्।

## प्रवर्तनम् - ७

### जीविनां नामकथनम्

अध्यापकः/अध्यापिका नवमालिकायां (पुटसंख्या ३३) सूचिते प्रवर्तने दत्तानां परिचितानां पक्षिणां मृगाणां च नामकथनाय निर्दिशतु। छात्राः उत्तराणि वदन्तु।

यथा - कुक्कुटः, कादम्बः, अजः, शुनकः, धेनुः, अश्वः इति।

## प्रवर्तनम् - ८

### नामविवेचनम्

आरामे (पुटसंख्या २८) विद्यमानम् ‘उचितं नाम किम्?‘ इति प्रवर्तने दत्तचित्राणि प्रदर्शयति। तैः साकं दत्तानां पदानामपि परिचायनं करोति। ततः चित्रस्य उचितं पदं किम् इति वलयीकरणाय प्रेरयति।



DRAFT

यथा- शुनकः, नकुलः, शशकः इति।

## प्रवर्तनम् - ९

### चित्राणां समाहरणं सचित्रपुस्तके योजनं च।

अध्यापिका/अध्यापकः छात्रैः परिचितानां पठितपूर्वाणां च मृगाणां पक्षिणां च चित्राणां समाहरणाय निर्दिशतु। तानि सचित्रपुस्तके योजयन्तु छात्राः। अवश्यं चेत् अध्यापकेन/अध्यापिकया साहाय्यं कार्यम्।

## प्रवर्तनम् - १०

### चित्रप्रदर्शनम् वस्तुकथनं च।

अध्यापिका/अध्यापकः नवमालिकायां (पुटसंख्या ३४) विद्यमानं चित्रं प्रदर्शयति। चित्रे किं किं पश्यति ? इति पृच्छति। छात्राः उत्तरं वदन्ति।

यथा - बालः, बालिका, शलभः, इत्यादीनि। साधूत्तरकथनाय अध्यापकेन/ अध्यापिकया साहाय्यं करणीयम्। प्रवर्तनमिदम् आगामिनः पाठस्य श्रृङ्खलाप्रवर्तनरूपेण कल्पितम्।

### अधिकांशः

अध्यपिका/अध्यापकः दत्तस्य चातकपक्षिणः चित्रं प्रदर्श्य केरलराज्यस्य औद्योगिकपक्षी चातकः इति परिचाययतु।

एवं 'मैत्री प्रीतिसंवर्धिनी' इति सूक्तेः यथोचितं विशदीकरणमपि कार्यम्।

### उद्ग्रथितसमीपनम्

परिसरपठनम्, प्रवृत्तिपरिचयः

### पठनसामग्र्यः

पाठपुस्तकम्, प्रवर्तनपुस्तकम्, श्यामफलकम्, चार्ट्पत्रम्, मधुवाणी, बालरञ्जिनी, व्यवहारपदमाला ।

### प्रश्ननिर्धारणम्

मानविकतायाः प्रकटितभावौ भवतः स्नेहः सौहार्दं चेति बोधः जायते।

DRAFT

**सविशेषश्रद्धार्हाणां कृते प्रवर्तनानि।**

वर्णलेपनम्, मुखावरणनिर्माणम्।

**प्रतीक्षितोत्पन्नानि**

सचित्रपुस्तकं, मुखावरणानि।

**शब्दकोशः**

| | |
|---|---|
| वृक्षः - മരം | कूर्मः - ആമ |
| भेकः - തവള | मार्गः - വഴി |
| मीनः - മീൻ | नक्षत्रम् - നക്ഷത്രം |
| नरः - മനുഷ്യൻ | मूषकः - എലി |

DRAFT